# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (२०)

## १२.०३.२०१३

# ५१६. वाहः (४.१.६१)

- एकपदात्मकं सूत्रम् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति अनुवर्तते ।
- वाहन्तात् प्रातिपदिकात् ङीष् स्यात् ।
- ङीषेवानुवर्तते न ङीप् ।
- ‘दित्यवाट् च मे दित्यौही च मे’ ।
- दित्यौहीति ।

# ५१७. सख्यशिश्वीति भाषायाम् (४.१.६२)

- पदत्रयम् । सखी-अशिश्वी, इति, भाषायाम् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- सख्यशिश्वी ।
- इतिशब्दः प्रकारे भाषायाम् इत्यस्यानन्तरं द्रष्टव्यः ।
- तेन छन्दस्यपि क्वचित् ।
- इति शब्द् इति ।
- भाषायामित्यस्येति ।

- सखी ।
- सखीति ।
- अश्शिश्वी ।
- अश्शिश्वीति ।
- ‘आ धेनवो धुनयन्तामशिश्वीः’ ।

# ५१८. जातेरस्त्रीविषयादयोपधात् (४.१.६३)

- पदत्रयम् । जातेः, अस्त्रीविषयाद्, अयोपधात् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति अनुवर्तते ।
- जातिवाचि यन्न स्त्रियां नियतम् अयोपधं ततः स्त्रियां ङीष् स्यात् ।
- न च स्त्रियां नियतमिति ।

- ‘आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक् ।
- सकृदाख्यातिनिर्ग्राह्या गोत्रं च चरणैः सह ॥’ (महाभाष्यम्)

- आकृतिग्रहणा जातिः -
- अनुगतसंस्थानव्यङ्ग्येत्यर्थः ।
- आकृतिग्रहणा जातिरिति ।
- अनुगतेति ।

- तटी ॥
- तटीति ।

- ‘लिङ्गानां च न सर्वभाक् । सकृदाख्यातिनिर्ग्राह्या - ’
- ‘असर्वलिङ्गत्वेन सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः’ इति लक्षणान्तरम् ।
- लिङ्गानां च.. इति ।
- वृषली ।
- वृषलीति ।

- सत्यन्तं किम्?
- शुक्ला ।
- शुक्लेति ।

- सकृदित्यादि किम्?
- देवदत्ता ।
- देवदत्तेति ।

- -‘गोत्रं च चरणैः सह’ ।
- गोत्रं च.. इति ।
- अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दः जातिकार्यं लभते इत्यर्थः ।
- औपगवी ।
- औपगवीति ।

- कठी ।
- कठीति ।

- कलापी ।
- कलापीति ।

- बह्वृची ।
- बह्वृचीति ।

- ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठात् ङीना ङीष् बाध्यते ।

- जातेः किम्?
- मुण्डा ।
- मुण्डेति ।

- अस्त्रीविषयात् किम्?
- बलाका ।
- बलाकेति ।

- अयोपधात् किम्?
- क्षत्त्रिया ।

- ‘योपधप्रतिषेधे हय-गवय-मुकय-मनुष्य-मत्स्यानाम् अप्रतिषेधः’ (वा)
- हयी ।
- गवयी ।
- मुकयी ।

- ‘हलस्तद्धितस्य’ (६.४.१५०) इति यलोपः ।
- हलः परस्य तद्धितयकारस्य लोपः स्याद् ईकारे तद्धिते च परे ।
- ‘मनोर्जातावञ्यतौ षुक् च’ (४.१.१६१) इति मनुशब्दात् तद्धिते यत्प्रत्यये षुगागमे मनुष्यशब्दः निष्पन्नः ।
- मनुष्य ई इति स्थिते हलः षकारात् परः तद्धितप्रत्ययावयवः यकारः ईकारे परे लुप्यते ।
- मनुषी ।

- ‘मत्स्यस्य ङ्याम्’ । (‘सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः’ - ६.४.१४९)
- मत्सी ।